# Shri Mangalacharyamahamunindrapranita Vedantachintamanih

# શ્રીમઙ્ગલાચાર્યમહામુનીન્દ્રપ્રણીતા વેદાન્તચિન્તામણિઃ

## Document Information

Text title : Shri Mangalacharyamahamunindrapranita Vedantachintamanih

File name : vedAntachintAmaNiHmangalAchAryamahAmunIndra.itx

Category : raama, rAmAnanda

Location : doc_raama

Author : maNgalAchAryamahAmunIndra

Transliterated by : Mrityunjay Pandey

Proofread by : Mrityunjay Pandey

Description/comments : From Chatuh Sampradaya Dig-Darshanm

Latest update : December 3, 2023

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

December 3, 2023

*sanskritdocuments.org*

Shri Mangalacharyamahamunindrapranita Vedantachintamanih

# શ્રીમઙ્ગલાચાર્યમહામુનીન્દ્રપ્રણીતા વેદાન્તચિન્તામણિઃ

શ્રીરામાદ્વિતતાં પ્રણમ્ય હિ નિજામાચાર્યસત્સન્તતિં
પીઠાચાર્યસુમઙ્ગલાર્યકૃતિના રામાય ભક્ત્યાઽર્પિતઃ ।
નાનાતર્કતમોવિમૂઢમનસાં વેદાન્તબોધાર્થિનાં
સદ્બોધાય મહામહો વિતનુતાં વેદાન્તચિન્તામણિઃ ॥ ૧॥

શેષસ્તનૂ રઘુપતેરણુચેતનોંઽશ-
શ્ચાન્યો મતેર્હિ કરણાદ્વપુષોઽપ્યસુભ્યઃ ।
નિત્યોઽજડઃ પરવશઃ કૃતિભુક્તિશાલી
ભિન્નોઽસુભૃત્ પ્રતિવપુઃ સુખબુદ્ધિરૂપ ॥ ૨॥

મુક્તાવિમુક્તવિધયા દ્વિવિધત્વમાપ્તા
જીવા મિથો જનકજાપતિતોઽપિ ભિન્નાઃ ।
મુક્તા અનન્તભજનાજ્જનિમૃત્યુમુક્તા
બદ્ધાસ્ત્વનન્તજનિકર્મસુબન્ધબદ્ધાઃ ॥ ૩॥

શુદ્ધાવિશુદ્ધભિદયા દ્વિવિધઞ્ચ સત્વં
કાલો મતિર્ગતમતેરચિતઃ પ્રભેદાઃ ।
સાકેતનિત્યપરધામપદાભિધેયં
સત્વં વિશુદ્ધમજડં પ્રકૃતેર્વિભિન્નમ્ ॥ ૪॥

નિત્યાઽકૃતિર્ગુણવતી પ્રકૃતિઃ પરાર્થા
તથ્યા ચ મૂલમહદાદિકભેદભિન્ના ।
ભૂતાદિકવ્યવહૃતેર્જનકો હિ કાલો
નિત્યો વિભુર્ભુવનનાથવપુર્જડશ્ચ ॥ ૫॥

નિત્યા તથા સવિષયા જડતાવિહીના
વિભ્વી મતિર્મદદયાપ્રભૃતિસ્વરૂપા ।
પ્રામાણ્યમત્ર સુમતં સ્વત એવ ચાસ્યા
યાથાર્થ્યાકં વિષયસત્યતયા તથા ચ ॥ ૬॥

લોકૈકહેતુરજડશ્ચિચિદ્વિશિષ્ટઃ
શ્રેયોગુણૈકજલધિર્હતદોષવૃન્દઃ ।
સર્વેશ્વરઃ ક્ષિતિજયા સહ દિવ્યદેહો
ધ્યેયોઽમૃતાય સુજનૈરિહ જાનકીશઃ ॥ ૭॥

સચ્ચિત્સુખં ચ સુખિસૃષ્ટિકરં પરેશં
વ્યૂહાર્ણ્યમૂર્ત્તિવિભવપ્રભવં ચ હૃત્સ્થમ્ ।
રામં વદાન્યવિભુસર્વવિદં ભજધ્વં
હાલાહલસ્ય સદૃશાન્ વિષયાન્ વિહાય ॥ ૮॥

વેદાન્તવેદ્યકરુણાકરનિત્યબન્ધોઃ
સીતાપતેઃ શ્રિતજનાહિતનાશકર્તુઃ ।
ભવ્યાં ભવાબ્ધિતરણે તરણિં પ્રપત્તિં
ભક્તિં વિના ચ મનુજો લભતે ન મુક્તિમ્ ॥ ૯॥

ધૂલ્યા મુનીન્દ્રગૃહિણીજડતાપહર્ત્તુ-
ર્બ્રહ્મેશ્વરાદ્યદિતિનન્દનવન્દિતાગ્રાત્ ।
ભાગીરથીપ્રભૃતિતીર્થગણૈકવન્દ્યા-
ન્નાન્યા ગતિઃ સુખદરામપદારવિન્દાત્ ॥ ૧૦॥

ઇતિ શ્રીમઙ્ગલાચાર્યમહામુનીન્દ્રપ્રણીતઃ વેદાન્તચિન્તામણિઃ સમાપ્તા ।

Encoded and proofread by Mrityunjay Pandey

*Shri Mangalacharyamahamunindrapranita Vedantachintamanih*

pdf was typeset on December 3, 2023

Please send corrections to *sanskrit@cheerful.com*